# कथासंक्षेपः ।

महाकविकालिदासेन विरचितं विश्वप्रसिद्धं नाटकं भवति अभिज्ञानशाकुन्तलम् । अस्मिन् नाटके सप्ताङ्काः विद्यन्ते।मृगयाविनोदार्थं वनं प्राप्तः राजा दुष्यन्तः शकुन्तलां दृष्ट्वा तस्यामनुरक्तो बभूव । यद्यपि गान्धर्वविधिमनुसृत्य शकुन्तलां परिणीतवान् तथापि सः राज्यकार्यार्थं नगरं प्रत्यागच्छत् । एकदा दुर्वाससं समादर्तुं विस्मृत्य दुष्यन्तस्मरणायां निमग्नां शकुन्तलां महर्षिरशपत् । अन्तर्वत्नीं शकुन्तलां दुष्यन्तसविधं प्रेषयितुं कण्वमहर्षिः निश्चितवान् ।

अभिज्ञानशाकुन्तलस्य चतुर्थोऽङ्के शकुन्तलायाः पतिगृहगमनवेलायां कण्वमहर्षिः दुष्यन्ताय कृतं सन्देशं शार्ङ्गरवं बोधयति। अनन्तरं भर्तृगृहे सपत्नीः परिचारकान् च प्रति आचरणीयानि कार्याणि श्लोकरूपेण उपदिशति। तपोवनविरहाकुलां शकुन्तलां तस्याः प्रत्यागमनकालमधिकृत्य कण्वः श्लोकरूपेण वदति तां प्रति सुपथमाशंसते च। परं यदा शकुन्तला नयनपथाद् विनष्टा तदा दुःखिते सख्यौ समाश्वासयति स्वनिर्वृत्तेन कर्तव्येन स्वयमाश्वासयति च।